www.sakshieducation.com

# 209(N)

(New Syllabus)

**II**

Total No. of Questions : 16
Total No. of Printed Pages : 4

**Regd. No.**

**Part-II**

## SANSKRIT, Paper-II

*(Second language)*

***Time : 3 Hours]*** ***[Max. Marks : 100***

***Note :***

1. **All** questions should be attempted.
2. Question Nos. **1**, **2** and **3** should be answered either in the medium of instructions of the candidate or in **Sanskrit** (Devanagari script).
3. The remaining Questions should be answered in **Sanskrit** (Devanagari script) only.

**सूचना** :- प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।

**1.** ***एकस्य*** श्लोकस्य प्रतिपदार्थं भावं च लिखत। 1×8=8

**अ.** परप्राण परित्राणपरः कारुण्यवान् भवेत्।
मांसं कपोतरक्षार्थं स्वं श्येनाय ददौ शिबिः ॥

***अथवा***

**आ.** दरिद्राणां कृते यस्य हृदयं परितप्यते।
सः महात्मेत्यहं वच्मि तद्विरुद्धो दुरात्मकः ॥

**2.** ***एकं*** निबन्धप्रश्नं समाधत्त। 1×6=6

**अ.** गङ्गा भगीरथस्य पितृदेवतानां पापं कथं धौतवती।

***अथवा***

**आ.** हरिश्चन्द्रः स्वस्य सत्यसन्धत्वं कथं अपालयत् ?



www.sakshieducation.com

www.sakshieducation.com


**3.** *एकं* निबन्धप्रश्नं समाधत्त। **1×6=6**

अ. अगस्त्य पण्डितः गोविन्दपट्टाभिषेकं कथं वर्णितवान् ?

आ. दधीचेः दानगुणमधिकृत्य लिखत।

**4.** *त्रयाणां* प्रश्नानां समाधानं लिखत। **3×2=6**

अ. भरतः कीदृशं रामं द्रष्टुमैच्छत् ?

आ. आत्मनः वनगमनविषये रामः भरतं किमवदत् ?

इ. वासुकिना गरुत्मान् किमिति अभिहितः ?

ई. किमर्थं गरुडेन देवलोकात् अमृतवृष्टिः पातिता ?

उ. पितृसद्मगोचरः अपि शिवः कीदृशः ?

ऊ. चिताभस्मनः रजः अपि केन विशुद्धमश्नुते ?

**5.** *द्वयोः* ससन्दर्भं व्याख्यानं लिखत। **2×3=6**

अ. विशाम्यहं हि पातालं तरसा गृह्य शङ्करम् ।

आ. भविता ते न कदापि सत्त्वसादः ।

इ. अवदत् माङ्गलिकं गलेऽस्ति ते ।

ई. जातस्त्वं भुवि गौतमस्य ।

**6.** *द्वयोः* ससन्दर्भं व्याख्यानं लिखत। **2×3=6**

अ. यदि कौतूहलम् आकर्ण्यताम् ।

आ. भो भोः ! मा भैष भद्राः ।

इ. ईदृशस्य नृपस्य राज्ये जलपानमपि अधर्मः ।

ई. मन्ये इदं मम परमं सौभाग्यम् ।

**7.** *त्रयाणां* प्रश्नानां समाधानं लिखत। **3×2=6**

अ. कस्याः पतनं पृथिवी न सहिष्यति ?

आ. अगस्त्यः कम्परायाय किमर्थं खड्गं प्रेषयति ?

इ. कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श ?

ई. केन सर्वरोगस्य सम्भवः भवति ?

उ. चन्द्रमत्याः हरिश्चन्द्रस्य स्मृतिः कस्मात् आगता ?

ऊ. अयं पुष्पविलापः कस्य कवेः ग्रन्थस्य अनुवादः भवति ?

www.sakshieducation.com

www.sakshieducation.com



**8.** ***त्रयाणां*** प्रश्नानां समाधानं लिखत। **3×2=6**

अ. अगस्त्य मुनेः आश्रमः कस्य तीरे आसीत् ?

आ. गोपाः इन्द्रस्य पूजां त्यक्त्वा कस्य पूजां कृतवन्तः ?

इ. वीरः कः ? सः किमर्थं भूमण्डले निवसति ?

ई. श्रीरामकृष्णः कम् आश्रित्य वसति स्म ?

उ. शिखिध्वजः कीदृशः ? सः राज्ये किमकरोत् ?

ऊ. विष्णोः वचनं श्रुत्वा इन्द्रः किमवदत् ?

**9.** एकेन वाक्येन समाधानं दत्त। **5×1=5**

अ. भगीरथः कुत्र तपः आतिष्ठत् ?

आ. मधुराविजयस्य कर्त्री का ?

इ. शिशुपालस्य शिरः केन छिन्नम् ?

ई. सर्वरोगक्षयः केन भवति ?

उ. सत्यविजयः इत्ययं पाठ्यभागः केन विरचितः ?

**10.** एकेन वाक्येन समाधानं दत्त। **5×1=5**

अ. शुकस्य नाम किम् ?

आ. गोविन्दपट्टाभिषेकः कस्मात् ग्रन्थात् स्वीकृतः ?

इ. वीरः राज्ञः कण्ठे कीदृशीं दिव्यमालां समर्पितवान् ?

ई. शिखिध्वजस्य भार्या का ?

उ. पूर्णाहुतिकाले यज्ञकुण्डलात् कः असुरः निर्गतः ?

**11.** अधोनिर्दिष्ट कथां पठित्वा प्रश्नानां समाधानानि दत्त। **5×1=5**

आसीत् व्याघ्रपुरे जीर्णधनः नाम वणिक्। सः पित्र्यं यत्किञ्चित् धनं भोगेन क्षपितवान्। अथ द्रव्यक्षयात्तत्रवासं कर्तुं लज्जमानः देशान्तरं गन्तुमैच्छत् । तस्य गृहेलोहभारघटिता तुला कापि आसीत्। सः तां स्वमित्रस्य कस्यापि श्रेष्ठिनो गृहे निक्षिप्य जगाम। कतिपयदिनान्तरम् सः श्रेष्ठि गृहं गत्वा सा निक्षेपतुला दीयताम् इत्याह। वञ्चकः श्रेष्ठी तुला कस्यांचित् रात्रौ मूषिकैः भक्षिता इति अवदत्। वणिक् तु तस्य वञ्चनां ज्ञात्वापि किमपि नोवाच। ततः नदीस्नानाय गच्छन् सः श्रेष्ठिनः पुत्रं आत्मना सहअनयत् । किञ्चित्कालानन्तरं पुनरागत्य सः श्रेष्ठिनमवोचत् यत् बालः हठादागतेन गृध्रेण नीतः। कथं तदिति पृच्छति तस्मिन् सोऽवदत् "यथा मे तुला मूषिकैः भक्षिता तथा ते पुत्रः गृध्रेण नीतः ।



www.sakshieducation.com

www.sakshieducation.com


प्रश्नाः

(1) वणिजः नाम किम् ?

(2) वणिक् धनं केन क्षपितवान् ?

(3) वणिक् किमर्थं देशान्तरं गन्तुमैच्छत् ?

(4) वणिजः गृहे का आसीत् ?

(5) वञ्चकः श्रेष्ठी तुलाविषये किमुक्तवान् ?

12. नामनिर्देशपूर्वकं ***त्रीणि*** सन्धत्त। **3×2=6**

अ. सद् + जनः ।

आ. रामस् + षष्ठः ।

इ. सुप् + अन्तम् ।

ई. जगत् + नाथः ।

उ. तपः + वनम् ।

ऊ. गुरुः + जयति ।

13. नामनिर्देशपूर्वकं ***त्रीणि*** विघटयत। **3×2=6**

अ. शरच्चन्द्रः । आ. हरिष्टीकते ।

इ. अज्ञादिः । ई. तन्नाम ।

उ. निस्सन्देहः । ऊ. नमस्ते ।

14. **द्वयोः** शब्दयोः सर्वविभक्ति रूपाणि लिखत। **2×6=12**

अ. भिषक् आ. राजन्

इ. वाक् ई. यद् (पुं.)

15. समास नामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत।। **3×2=6**

अ. प्रतिदिनम् आ. अधर्मः

इ. भोज्योष्णम् ई. त्रिभुवनम्

उ. चक्रपाणिः ऊ. पार्वतीपरमेश्वरौ

16. रेखाङ्कित पदं शुद्धीकृत्य वाक्यं लिखत। **5×1=5**

(1) उपाध्यायः पाठान् पाठयन्ति।

(2) वृक्षात् फलम् अपतन् ।

(3) बालिकाः सम्यक् गायति।

(4) तौ चित्रं पश्यन्ति।

(5) वयं विपणिं गमिष्यामि।


www.sakshieducation.com

२१/त